श्री अरुणाचलाष्टकम्

श्री अरुणाचलाष्टकम्

दर्शनादभ्रसदसि जननात्कमलालये |
काश्यां तु मरणान्मुक्तिः स्मरणादरुणाचले || 1 ||

करुणापूरितापांगं शरणागतवत्सलम् |
तरुणेंदुजटामौलिं स्मरणादरुणाचलम् || 2 ||

समस्तजगदाधारं सच्चिदानंदविग्रहम् |
सहस्ररथसोपेतं स्मरणादरुणाचलम् || 3 ||

कांचनप्रतिमाभासं वांछितार्थफलप्रदम् |
मां च रक्ष सुराध्यक्षं स्मरणादरुणाचलम् || 4 ||

बद्धचंद्रजटाजूटमर्धनारीकलेबरम् |
वर्धमानदयांभोधिं स्मरणादरुणाचलम् || 5 ||

कांचनप्रतिमाभासं सूर्यकोटिसमप्रभम् |
बद्धव्याघ्रपुरीध्यानं स्मरणादरुणाचलम् || 6 ||

शिक्षयाखिलदेवारि भक्षितक्ष्वेलकंधरम् |
रक्षयाखिलभक्तानां स्मरणादरुणाचलम् || 7 ||

अष्टभूतिसमायुक्तमिष्टकामफलप्रदम् |
शिष्टभक्तिसमायुक्तान् स्मरणादरुणाचलम् || 8 ||

विनायकसुराध्यक्षं विष्णुब्रह्मेंद्रसेवितम् |
विमलारुणपादाब्जं स्मरणादरुणाचलम् || 9 ||

मंदारमल्लिकाजातिकुंदचंपकपंकजैः |
इंद्रादिपूजितां देवीं स्मरणादरुणाचलम् || 10 ||

संपत्करं पार्वतीशं सूर्यचंद्राग्निलोचनम् |
मंदस्मितमुखांभोजं स्मरणादरुणाचलम् || 11 ||
इति श्रीअरुणाचलाष्टकम् ||